Roll No. .................

# 1005

## कक्षा 10वीं अर्द्ध वार्षिक परीक्षा, 2024-25

[512]

# SANSKRIT
# संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 75]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

*(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (1×6=6)

(i) 'फल' शब्दस्य द्वितीया–एकवचनस्य रूपं भवति –

(अ) फलम् (ब) फलानि

(स) फले (द) फलाभ्याम्

(ii) 'छात्रैः' इति पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) एतेषु कोऽपि न

(iii) अधोलिखितेषु चतुर्थी–विभक्तियुक्तं पदम् अस्ति –

(अ) रामम् (ब) रामः

(स) रामाय (द) रामात्



https://www.mpboardonline.com

(iv) 'अहम्' इति पदे (शब्दे) पुरुषः अस्ति –

(अ) मध्यमपुरुषः (ब) प्रथमपुरुषः

(स) उत्तमपुरुषः (द) एतेषु कोऽपि न

(v) 'अश्वः शीघ्रं धावति' इत्यस्मिन् पदे अव्ययम् अस्ति –

(अ) अश्वः (ब) शीघ्रं

(स) धावति (द) एतेषु कोऽपि न

(vi) अधोलिखितेषु अव्ययपदं नास्ति –

(अ) यदा (ब) तदा

(स) कदा (द) रमा

प्र.2 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – (1×6=6)

(अनु, लट्लकारः, पा, निर्, एकवचनम्, पठतु)

(i) 'अभवत्' इत्यस्मिन् पदे .................................. वचनम् अस्ति।

(ii) प्रथम पुरुषस्य लोट्लकारस्य ............................ रूपम् अस्ति।

(iii) 'गच्छति' इत्यस्मिन् पदे .................................. लकारः अस्ति।

(iv) 'पिबन्ति' इत्यस्मिन् पदे .................................. धातुः अस्ति।

(v) 'अनुभवः' पदे .................................................. उपसर्गः अस्ति।

(vi) 'निर्वाणरूपं' इति पदे .................................. उपसर्गः अस्ति।

प्र.3 उचितं युग्ममेलनं कुरुत – (1×6=6)

| (अ) | (ब) |
|---|---|
| (i) वृद्धिस्वरसन्धिः | (क) पञ्चरत्नम् |
| (ii) द्वन्द्वसमासः | (ख) जगदीशः |
| (iii) महा + ईशः | (ग) महाराजा |
| (iv) कर्मधारयसमासः | (घ) सदैव |
| (v) व्यञ्जनसन्धिः | (ङ) महेशः |
| (vi) द्विगुसमासः | (च) पितरौ |



https://www.mpboardonline.com

प्र.4 एकपदेन उत्तरं लिखत – (1×6=6)

(i) अतिथिः केन प्रबुद्धः?

(ii) वनराजः कैः दुरवस्थां प्राप्तः?

(iii) व्याघ्रः कस्मात् बिभेति?

(iv) 'पठितुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(v) 'क्त्वा' प्रत्ययस्य एकम् उदाहरणं लिखत।

(vi) 'अज + टाप्' इति संयुज्य किं पदं भविष्यति?

प्र.5 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां 'समक्षम्' 'न' इति लिखत – (1×6=6)

(i) 'क्रुद्धः सिंहः गर्जति' वाक्येऽस्मिन् क्रुद्धः विशेषणम् अस्ति।

(ii) 'पक्वं फलं भुङ्क्ते' अत्र फलं विशेष्य नास्ति।

(iii) 'कातरः' इत्यस्य पदस्य अकातरः विलोमपदं अस्ति।

(iv) 'प्रसीदति' इत्यस्य पदस्य विलोमपदं प्रसन्नः अस्ति।

(v) 'गजः' इत्यस्य पदस्य पर्यायपदं हस्ती अस्ति।

(vi) 'मुखम्' इत्यस्य पदस्य पर्यायपदं आननं नास्ति।

**प्रश्न क्रमांकः 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन संस्कृतभाषायां लिखत –**

प्र.6 पृथिव्याः स्खलनात् किं जायते? (2)

<u>अथवा</u>

अस्माकं पर्यावरणे किं किं दूषितम् अस्ति?

प्र.7 व्याघ्रः किं विचार्य पलायितः? (2)

<u>अथवा</u>

पिता पुत्राय बाल्ये किं यच्छति?

प्र.8 कुशलवयोः वंशस्य कर्त्ता कः? (2)

<u>अथवा</u>

निर्धनः जनः कथं वित्तम् उपार्जितवान्?



https://www.mpboardonline.com

प्र.9 बकः वन्यजन्तूनां रक्षोपायान् कथं चिन्तयितुं कथयति। (2)

अथवा

कृषकः किं करोति स्म?

प्र.10 जनस्य क्रन्दनं निशम्य आरक्षी किम् उक्तवान्? (2)

अथवा

केन समः बन्धुः नास्ति?

प्र.11 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषित एकं लिखत। (2)

प्र.12 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः – (कोऽपि द्वे) (1×2=2)

(i) त्वं कुत्र गच्छति।

(ii) श्रीकृष्णं नमः।

(iii) रामं सह लक्ष्मणं गच्छति।

प्र.13 रिक्तस्थानानि पूरयत – (कोऽपि चत्वारि) (½×4=2)

(i) मयूरः .................................................. इति नाम्नाऽपि ज्ञायते।

(ii) .................................................. जीवनं दुर्वहम् अस्ति।

(iii) बकः अविचलः .................................................. इव तिष्ठति।

(iv) ज्वालामुखपर्वतानां विस्फोटैरपि .................................................. जायते।

(v) त्यक्त्वा धर्मप्रदां .................................................. परुषां योऽभ्युदीरयेत्।

(vi) न्यायाधीशः ................................ उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।

प्र.14 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – (½×4=2)

(i) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।

(ii) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(iii) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।

(iv) प्रत्युत्पन्नमतिः सा श्रृगालम् आक्षिपन्ती उवाच।

प्र.15 वाच्यपरिवर्तनं कुरुत – (कोऽपि द्वे) (1×2=2)

(i) बालकः पुस्तकं पठति। (कर्मवाच्ये)

(ii) मया विद्यालयः गम्यते। (कर्तृवाच्ये)

(iii) छात्रः लिखति। (भाववाच्ये)



https://www.mpboardonline.com

प्र.16 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वौ) (1×2=2)

(i) सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति।

(ii) <u>सुराधिपः</u> ताम् अपृच्छत्।

(iii) धैर्यवान् <u>लोके</u> परिभवं न प्राप्नोति।

प्र.17 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) (1×2=2)

| | कः | कम् |
|---|---|---|
| (i) जानाम्यहं तस्य नामधेयम्। | ............ | ............ |
| (ii) अरे अहिभुक्! नृत्याति रिक्तं का तव विशेषता। | ............ | ............ |
| (iii) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। | ............ | ............ |

प्र.18 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – (1×3=3)

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

प्रश्नाः –

(i) प्रसृते विजने प्रदेशे का न शुभावहा?

(ii) करुणापरो गृही कस्मै आश्रयं प्रायच्छत्?

(iii) रात्रिनिवासं कुत्र कृतवान्?

<u>अथवा</u>

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः। तत्रनिहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृहणाच्च परं तदानीमेव किञ्चिद् विचित्रमघटत्। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

प्रश्नाः –

(i) गृहाभ्यन्तरं कः प्रविष्टः?

(ii) कस्य पादध्वनिना प्रबुद्धोऽतिथिः?

(iii) कीदृशी दैवगतिः?



https://www.mpboardonline.com

प्र.19 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – (3)

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

प्रश्नाः –

(i) समत्वम् इति कः भवेद्?

(ii) चित्ते का भवेद्?

(iii) अवक्रता कुत्र भवेद्?

अथवा

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

प्रश्नाः –

(i) प्रथमो धर्मः कः?

(ii) प्राणेभ्योऽपि विशेषतः कं रक्षेत्?

(iii) आचारः प्रथमो धर्मः इति केषां वचः?

प्र.20 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – (3)

व्याघ्रचित्रकौ – अरे! किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः – तूष्णीं भव भो! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यते अतएव विचार विमर्शः प्रचलति।

बकः – सर्वथा सम्यगुक्तं सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतं परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।



https://www.mpboardonline.com

प्रश्नाः –

(i) वस्तुतः केन बहुकालपर्यन्तं शासनं कृतम्?

(ii) काः भक्षकं रक्षकपदयोग्यं न मन्यते?

(iii) व्याघ्रचित्रकौ किम् अवदत्?

<u>अथवा</u>

वनस्य दृश्यं समीपे एवैका नदी वहति। एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षामारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं–वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

प्रश्नाः –

(i) एकः वानरः कस्य पुच्छं धुनाति?

(ii) के वारं–वारं सिंहं तुदन्ति?

(iii) हर्षमिश्रितं कलरवं के: कुर्वन्ति?

प्र.21 अवकाश–प्राप्तये प्राचार्यं प्रति प्रार्थनापत्रं लिखत। **(4)**

<u>अथवा</u>

स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्रं प्रति पत्रं लिखत।

प्र.22 अधोलिखितेषु एकं विषयं आधृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – **(4)**

(i) महाकविः कालिदासः

(ii) विज्ञानस्य आविष्कारः

(iii) संस्कृतभाषायाः महत्त्वम्

(iv) दूरदर्शनम्



https://www.mpboardonline.com

प्र.23 अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – (4)

अस्माकं देशस्य नाम 'भारतवर्षम्' इति अस्ति। पुरा अस्माकं देशे भरतनामा दुष्यन्तपुत्रः महाप्रतापी राजा बभूव। तस्य एवं सम्बन्धात् अस्य देशस्य नाम अपि 'भारतम्' इति प्रसिद्धम्।

अस्मदीयः देशः प्रकृति–सम्पन्नः अस्ति। अत्र षड् ऋतवः यथासमयं आगत्य भारतं विविधाभिः सुषमाभिः भूषयन्ति। अस्माकं देशः विश्वगुरुः आसीत्। भारतवर्षम् अनेकेषां भाषा–देश–धर्म–संस्कृति–परम्पराणां देशः अस्ति।

प्रश्नाः –

(i) धर्म–संस्कृति–परम्पराणां देशः कः अस्ति?

(ii) दुष्यन्त–पुत्रस्य नाम अस्ति।

(iii) कति ऋतवः सुषमाभिः भूषयन्ति?

(iv) अस्मदीयः देशः कीदृशः अस्ति?

-----------------------------------------------



https://www.mpboardonline.com